COMPILED AND CIRCULATED BY PROF. ASIS BHATTACHARYA
DEPARTMENT OF SANSKRIT, NARAJOLE RAJ COLLEGE

# सिद्धान्तकौमुदी :तिङन्तप्रकरणम्

## सूत्र- शेषे प्रथमः १।४।१०८

परशब्दः अतिशयवाची, वर्णानां परः = अतिशयितः सन्निकर्षः = प्रत्यासत्तिः संहितासंज्ञकः भवति।

मध्यमोत्तमयोरविषये प्रथमः स्यात् ।भू सत्तायाम् ॥ कर्तृविवक्षायां भू ति इति स्थिते ॥

परशब्दो ऽतिशये वर्तते। संनिकर्षः प्रत्यासत्तिः। परो यः सन्निकर्षः, वर्णानाम् अर्धमात्राकालव्यवधानं, स संहितासंज्ञो भवति। दध्यत्र। मध्वत्र। संहिताप्रदेशाः सिंहितायाम् ६।१।७० इत्येवम् आदयः।

ठपरशब्दोऽतिशये वत्र्तते" इति। यथा परं दुःखमिति। एतन परशब्दोल दिगादिष्वप्यर्थेषु वत्र्तते, तथापीहातिशये वत्र्तमानस्य तस्य ग्रहणमित दर्शयति। सन्निकर्षः = प्रत्यासत्तिः, संश्लेषश्च। तत्रेह प्रत्यासत्तिर्गृह्रत इति दर्शयन्नाह-- "सन्निकर्षः प्रत्यासत्तिः" इति। संश्लेषस्तु न गृह्रते, तस्य वर्णेष्वसम्भवात्। संश्लेषो ह्रेककालानांभवति,नचवर्णामामेककालतापत्तिः; क्रमेणोच्चारित्वादुच्चरितप्रध्वंसितत्वात्। संश्लेषोह्रेककालानांभवति,नचवर्णानामेककालतापत्तिः;क्रमेणोच्चारित्वादुच्चरितप्रध्वंसत त्वात्। सत्यामपि चैककालतायां न सम्भवत्येव वर्णानां सश्लेषः। तथा हि-- संश्लेषः संयोगतो वा स्यात्, समवायतो वा; तत्र पूर्वको द्रव्यस्यैव स्यात्, न तु शब्दस्य-- निर्गुणा गुणा इति कृत्वा। इतरोऽपि नैव शब्दस्य सम्भवति, न हि वर्णो वर्णे समवैति; शब्दस्याकाशसमवायित्वात्। न च संयोगसमवाययोरतिशयः सम्भवति; सर्वत्रैकरुपकत्वात्।तथाच"परः" इति विशेषणं नोपपद्यते। प्रत्यासत्तिस्त्वपेक्षाकृतभेदात् प्रकर्षाप्रकर्षाभ्यां प्रयुज्यमानापरग्रहणेन विशिष्यत इति युक्तं तस्य विशेषणत्वम्। कः पुनरसौपरःसन्निकृष्टान्वर्णानुच्चारयतिवक्तरिपूर्वस्यवर्णस्ययेनिष्पादकास्ताल्वादयस्तेषां व्यापारोपरतौवर्णान्तरस्यचयेनिष्पादकास्ताल्वादयस्तेषांव्यापारोपदेशनमद्र्धमात्राकालमा

हुः।सवर्णानां व्यवधानः = व्यवधायको यस्मिन् सोऽद्र्धमात्राकालव्यवधानः सन्निकर्षः। यदिवर्णानामद्र्धमात्राकालव्यवधानः सन्निकर्षः,कथं तर्हि दध्यत्रेत्यादौ वयवधायककालो नोपलक्ष्यते,वर्णाः संश्लिष्टा एवोपलभ्यन्ते? नैतत्; किमर्थं पुनरेतदारभ्यते, यावता परमेव सन्निकर्षं संहितेति वदन्त्याचार्याः, तथा हि संहितामधीष्वेत्युक्ते परं सन्निकर्षमेवाधीते शिष्यः? नैतदेवम्; पदस्य पदान्तरेण यदानन्तर्यं सा संहितेति लोकेऽभिधीयते। तथा च वक्तारो वदन्ति-- संहितामधीते न पदानि, पदान्यधीते न संहितामिति। तथा चैकपदे हि संहिताकार्यं न स्यात्, ठइको यणचि"६।१।७४ इति-- कुमार्यौ, कुर्मार्य इति। सति ह्रस्मिन् वर्णानां सन्निकर्षविशेषस्यानेन संहितासंज्ञा विधीयत इत सर्वत्रैव भवति॥।

लुक्स्त्रियाम्। वतण्डाच्चेति विहितस्येति। "यञ" इति शेषः। वतण्डीति। वतण्डस्य गोत्रापत्यं स्त्री आङ्गिरसीति विग्रहः। यञो लुकि आदिवृद्धिनिवृत्तौ ङीनिति भावः। वातण्ड आयनीति। अञि आदिवृद्धौ लोहितादिलक्षणः ष्फः, षित्त्वान्ङीषिति भावः। "वतण्डाच्चे"ति विहितस्येत्यस्य प्रयोजनमाह--अणि तु वातण्डीति। शिवादित्वादणि गोत्रत्वेन जातित्वाज्जातिलक्षणे ङीषि तस्याऽणो वतण्डाद्विहितत्वेऽपि "वतण्डाच्चे"ति विहितत्वाऽभावान्न लुगिति भावः। ननु वतण्डादणि तस्य "अणिञोरनार्षयो"रिति वक्ष्यमाणः ष्यङ् स्यादित्यत आह--ऋषित्वादिति।

परः संनिकर्षः। परः=अतिशयितः। "दूरानात्मोत्तमाः पराः" इत्यमरः। सन्निकर्षः=सामीप्यम्।अर्धमात्राधिककालव्यवधानाऽभावः।अर्धमात्राकालव्यवधानस्याऽव र्जनीयत्वात्। तदेतदभिप्रेत्याह-अतिशयित इत्यादिना।

"परिशेषितस्य वे"ति बोध्यम्। एतच्च "आङ्गिरसे"इत्यनुवृत्त्या लभ्यते। यद्यपि "वतण्डाल्लुक् स्त्रिया"मित्येकसूत्रकरणेऽपि "आङ्गिरसे"इत्यनिवृत्त्या अनाङ्गिरसे यञणोर्लुगभावात् स्त्रियामिष्टं सिद्ध्यति, तथापि पुंस्याङ्गिरसे यञणोरुभयोः प्राप्तिरनिष्टेति तद्वारणाय पृथक् सूत्रं कृतम्। ऋषित्वादिति। न चैवं

"ऋष्यन्धके"त्यणि सिद्धे शिवादिगणे वतण्डपाठो व्यर्थं इति शङ्क्यम्। गर्गादिपाठेन यञा बाधात्तन्निवृत्तये तत्पाठस्यावश्यरकत्वात। ष्यङ्नेति। "अणिञोरनार्षयो"रिति सूत्रेणेति भावः।

## सूत्र- तिङ्शित्सार्वधातुकम् ३।४।११३

धातोः विहिताः तिङः शितश्च प्रत्यया सार्वधातुक-संज्ञकाः भवन्ति।
तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः ॥
तिङः शितश्च प्रययाः सार्वधातुकसंज्ञा भवन्ति। भवति। नयति। स्वपिति। रोदिति। पचमानः। यजमानः। सार्वधातुकप्रदेशाः सार्वधातुके यक् ३।१।६७ इत्येवम् आदयः।भवति, नयति" इति। तिङः सार्वधातुकसंज्ञायां तन्निबन्धनः कत्तरि शप्, तस्यापि शितः सार्वधातुकत्वात् "सार्वधातुकार्धधातुकयोः" ७।३।८४) इति गुणः। "रोदिति" इति। पूर्ववच्छपो लोपः, ठरुदादिभ्यः सार्वधातुके" ७।२।७६ इतीट्। "पवमानः, यजमानः" इति। "पूङ्यजोः शानन्" ३।२।१२८ ,तस्य सार्वधातुकत्वात् शप्, तस्यापि सार्वधातुकत्वाद्धातोर्गुणः॥
तत्र सार्वधातुककार्यं वक्ष्यन्सार्वधातुकंसंज्ञामाह-- तिङ्शित्। धातोरित्यधिकृतं। तदाह-- धात्वधिकारोक्ता इति। तेन "हरी"नित्यत्र शसः सार्वधातुकत्वं न, ठअन्यथा तिङ्शित्सार्वधातुक"मिति शसः सार्वधातुकत्वात्सार्वधातुकमपिदिति ङित्त्वे "घेर्ङिती"ति गुणः स्यात्।
धात्वदिकारोक्ता इति कम्?। हरीन्। शसः "सार्वधातुकमपि"दिति ङित्त्वे "घेर्ङिती"ति गुणः स्यात्, लिहः श्रिय इत्यादिशसन्तेषु "सार्वधातुके य"गिति यक्क स्यात्। केचित्तु वारिणी इत्यत्र नुमि कृतेऽपि लघूपधगुणः स्यादित्याहुः। तन्न। क्ङितीति निषेधात्, इगन्तत्वप्रयुक्तस्य नुमो गुणप्रयोजकत्वे सन्निपातपरिभाषाविरोधाच्च।

---